- introducing pre-qualifier for peer team visit, as 25% of system generated score.
- introducing *System Generated Scores* (SGS) with combination of online evaluation (about 52%) and peer judgment (about 48%)
- in introducing the element of *third party validation* of data and the possibility of roping in multiple agencies
- in adopting a 100% off site evaluation of HEIs applying for 4$^{th}$ cycle accreditation; on-site visits in exceptional cases
- in providing appropriate differences in the metrics, weightages and benchmarks to universities, autonomous colleges and affiliated/constituent colleges and now Sanskrit Universities and IHSS with this Manual.
- in revising several metrics to bring in enhanced participation of students and alumni in the assessment process

## मूल्यांकनप्रत्यायनयोः नवीना रूपरेखा

मूल्यांकनप्रत्यायनयोः नवीना रूपरेखा जुलै 2017तमे संवत्सरे निर्मिता क्रियान्विता च सूचनासम्प्रेषणप्रविध्यनुकूला , वस्तुनिष्ठा, पारदर्शिका, मानक्षमा, दृढा च विद्यते ; या क्षेत्रेऽस्मिन् महत् परिवर्तनं समानेष्यति।

तथा हि -

- अत्र प्रवरगणेन प्रदत्तस्य गुणाधारितनिर्णयस्य दत्तांशाश्रितपरिमाणसूचकमूल्यांकनस्य च स्वीकारात् मूल्यांकनस्य वस्तुनिष्ठता पारदर्शिता च वर्धिष्यते।
- सूचनासम्प्रेषणप्रविधेः सम्प्रयोगात् मानक्षमता दृढता च निश्चीयेत।
- प्रक्रियायाः सरलीकरणेन , प्रश्नावल्यां प्रश्नसङ्ख्यायाः न्यूनीकरणेन च प्रतिवेदनस्य लाघवं साध्येत, प्रवरसमितेः निरीक्षणदिवसानाम् अल्पीयस्त्वं च साध्येत।
- रा.मू.प्र.परिषदः मानकानां तुलनाम् अन्ताराष्ट्रियगुणवत्ताश्वासनरूपरेखया सह कृत्वा , तत्र गुणवत्ताप्रोन्नयनोपकरणत्वेन उत्कृष्टगुणमानस्य (Benchmark) विकसनं कृतम्।
- प्रवरसमितेः निरीक्षणार्थम् आगमनात् प्रागेव प्रायः पञ्चविंशत्प्रतिशतात्मकः मूल्याङ्कनांशः यान्त्रिकप्रणाल्या निर्धार्येत।
- यन्त्रनिर्धारिताङ्कव्यवस्थायाः संयोजनं - यत्र अधितन्त्रिमाध्यमेन मूल्याङ्कनं द्विपञ्चाशत्प्रतिशतं, तथा प्रवरगणसमीक्षयाः मूल्याङ्कनं च अष्टचत्वारिंशत्प्रतिशतं परिगणितम्।
- दत्तांशस्य बाह्यपरीक्षणेन वैधतासम्पादनं तथा नैकसंस्थानाम् एकसूत्रेण कार्यनिबन्धने सम्भवः।
- याः उच्चतरशिक्षासंस्थाः चतुर्थचक्रप्रत्यायनार्थम् आवेदयन्ति , ताः शतप्रतिशतं परोक्षमूल्याङ्कनद्वारा परीक्ष्यन्ते। विशिष्टसन्दर्भे प्रत्यक्षमूल्याङ्कनमपि सम्भवेत्।
- विश्वविद्यालयानां, स्वायत्तमहाविद्यालयानां, सम्बद्धमहाविद्यालयानां च कृते मानेषु , अधिमानेषु, उत्कृष्टगुणमानेषु च योग्यमन्तरं प्रदर्शितम्।
- मूल्याङ्कनप्रक्रियायां छात्राणां , पूर्वच्छात्राणां च अधिकभागग्रहणाय नानाविधमानानां परिष्करणम्।

(i) **Focus of Assessment**

NAAC assessment lays focus on the institutional developments with reference to three aspects: *Quality initiative, Quality sustenance and Quality enhancement.* The overall quality assurance framework of NAAC thus focuses on the values and desirable practices of HEIs and incorporates the core elements of quality assurance i.e. internal and external assessment for continuous improvement. The value framework of NAAC starts with its choice of unit of evaluation i.e. the Institution as a whole. The

Assessment and Accreditation process of NAAC which involves a combination of self evaluation and external peer evaluation implicitly or explicitly is concerned with looking at the developmental aspects of **the SUs and IHSS** in the context of quality.

In line with NAAC's conviction that quality concerns are institutional, Quality Assessment (QA) can better be done through self-evaluation. The self-evaluation process and the subsequent preparation of the Self Study Report (SSR) to be submitted to NAAC involves the participation of all the stakeholders – management, faculty members, administrative staff, students, parents, employers, community and alumni. While the participation of internal stakeholders i.e. management, staff and students provide credibility and ownership to the activity and could lead to newer initiatives, interaction with the external stakeholders facilitate the development process of the institution and their educational services. Overall, the QA is expected to serve as a catalyst for institutional self-improvement. It promotes innovation and strengthens the urge to excel.

It is attempted to. enlarge the digital coverage of the entire process of Assessment and Accreditation. It is believed that this will not only accelerate the process but also bring in greater objectivity into the process.

The possible differentiation required in respect of HEIs which are going for subsequent cycles of Assessment and Accreditation, appropriate scope has been provided in the Process. This will allow the HEIs to appropriately represent the developments they have attempted after the previous cycle of Assessment and Accreditation.

(i) **मूल्याङ्कनस्य केन्द्रबिन्दुः**

संस्थानां विकासं केन्द्रीकृत्य रा.मू.प्र.परिषद्

- गुणवत्तोपक्रमः
- गुणवत्ताभिरक्षणं
- गुणवत्तासंवर्धनं चेति त्रीन् पक्षान् अभिलक्ष्य मूल्याङ्कनं करोति।

एवं रा .मू.प्र.परिषद् संस्थायाः समग्रगुणवत्ताश्वासनरूपरेखाम् , उच्चतरशिक्षासंस्थानाम् अपेक्षितव्यवहारान्, मूल्यानि च केन्द्रीकृत्य मूल्याङ्कने प्रवर्तते। सा च रूपरेखा गुणवत्ताश्वासनस्य प्रधानतत्त्वानां सततविकासाय आन्तरिकं बाह्यञ्च मूल्याङ्कनम् अन्तर्भावयति। रा .मू.प्र.परिषद् समग्रां संस्थाम् एकांशत्वेन परिकलय्य मूल्याङ्कनस्य आद्यं चरणं प्रारभते। गुणवत्तासन्दर्भे संस्कृतविश्वविद्यालयानाम्

उच्चतरसंस्कृताध्ययनसंस्थानां च विकासपक्षाणां समवलोकनं मूल्याङ्कनप्रत्यायनप्रक्रियया प्रत्यक्षरूपेण, परोक्षरूपेण, स्वमूल्याङ्कनेन, बाह्य-प्रवरमूल्याङ्कनेन च संबद्धमस्ति।

मूल्याङ्कनप्रत्यायनप्रक्रियायां स्वमूल्याङ्कनमत्यन्तं महत्त्वपूर्णं वर्तते। उच्चतराध्ययनसंस्थासु एतस्य स्वमूल्याङ्कनस्य वस्तुनिष्ठतायाः , आत्मविश्लेषणस्य आत्मावलोकनप्रवृत्तेश्च विकासार्थम् अतितरां महनीया भूमिका भवति। रा .मू.प्र.परिषदा प्रस्तुतायाः निदर्शिकायाः स्वमूल्याङ्कनप्रारूपं विभिन्नाः निविष्टीः निष्पादनानि , सौविध्यानि च विवृणोति। संस्कृतविश्वविद्यालयाः संस्कृतसंस्थाश्च अनेन मूल्याङ्कनेन स्वीयशक्तीः, दौर्बल्यानि, अवसरान्, स्पर्धाह्वयान् च जानीयुः।

स्वमूल्याङ्कनात् परं रा .मू.प्र.परिषदे समर्पणीये स्वाध्ययनप्रतिवेदने प्रबन्धमण्डलस्य, शिक्षकाणां, प्राशासनिककर्मचारिणां, छात्राणाम्, अभिभावकानां, नियोजकानां, पूर्वच्छात्राणां, समुदायस्य च सहभाग इष्यते। छात्र -कर्मचारि-प्रबन्धमण्डलप्रभृतीनाम् आन्तरिकलाभग्राहिणां भागग्रहणं स्वाध्ययनप्रतिवेदननिर्माणप्रक्रियायाः विश्वसनीयताम् अधिकारं च पोषयति। अपि च बाह्यलाभग्राहिभिः सह संवादेन नूतनोपक्रमान् आरभते, विकासप्रणालीमुपकरोति, तेषां शैक्षिकसेवाश्च पुरस्करोति। स्वाध्ययनप्रतिवेदनं साकल्येन संस्थायाः स्वविकासस्य नवाचारस्य च प्रोन्नयने , उत्कृष्टतायाः प्राप्तये अभीप्सायाः संवर्धने प्रोद्बलने च समुत्प्रेरकं भवेदित्यपेक्षते।

मूल्यांकनप्रत्यायनप्रक्रियायां संगणकीयांकनपद्धत्याः संश्रयणे तस्याः बहुवि स्तारे च प्रयासो विहितः । एतेन प्रक्रियायां न केवलं वेगः समासादितः , अपि तु वस्तुनिष्ठताऽपि समानीता। याः संस्थाः प्रत्यायनस्य उत्तरोत्तरचक्रं प्रविशन्ति, तासां प्रत्यायनप्रक्रियायामपि ईषद्वैलक्षण्यसम्पादनाय प्रयासो विहितः , येन ताभिः संस्थाभिः साधितां प्रगति म्, अभिवृद्धिश्च प्रकाशयितुम् अवसरः प्राप्यते।

## III. QUALITY INDICATOR FRAMEWORK (QIF) - Description

The criteria based assessment forms the backbone of A&A process of NAAC. The seven criteria represent the core functions and activities of a HEI. In the revised framework not only the academic and administrative aspects of institutional

functioning but also the emerging issues have been included. The seven Criteria to serve as basis for assessment of HEIs are:

1. Curricular Aspects
2. Teaching-Learning and Evaluation
3. Research, Innovations and Extension
4. Infrastructure and Learning Resources
5. Student Support and Progression
6. Governance, Leadership and Management
7. Institutional Values and Best Practices

Under each Criterion a few Key Indicators are identified. These Key Indicators (KIs) are further delineated as Metrics which actually elicit responses from the HEIs. These seven criteria along with their KIs are given below explicating the aspects they represent.

The Criteria-based assessment promotes judgment based on values. For example the Criterion on “Governance, Leadership and Management” promotes the values such as participation, transparency, team work, systems view, justice, self-reliance and probity in public finance. NAAC has already developed a well defined set of key aspects and indicators under all these seven criteria. Considering the typical nature of SUs and IHSS, additional indicators have been identified under all these key aspects especially suitable to the mission and goals of SUs and IHSS.

The Key Aspects as well as the indicators identified under each of the seven criteria reflect the characteristics and values of the **SUs and IHSS** on which assessment is to be made. The indicators under each of the Key Aspects focus in particular on the outcomes and the over-all functioning of an institution.

The strengths or weaknesses in one area may have an effect on quality in another area. Thus the issues addressed within the Criteria and Key Aspects are closely inter-related and may even appear to be overlapping. The criteria and the Key Aspects are not a set of standards or measurement tools by themselves and do not cover everything which happens in every the **SU and IHSS.** They are the layers for transformational change and provide an external point of reference for evaluating the quality of the institution under assessment.

The NAAC has evolved a universal framework for Assessment and Accreditation of HEIs across the country, which has been suitably re-contextualized for SUs and IHSS. The application of this framework for SUs and IHSS will hopefully lead to the mainstreaming of these institutions and evolving a uniform pattern of Sanskrit education.

## गुणवत्तासूचकरूपरेखा - विवरणम्

रा.मू.प्र.परिषदा क्रियमाणं निकषाश्रितमूल्याङ्कनं मूल्याङ्कनप्रत्यायनयोः मूलस्तम्भः। सप्त निकषाः संस्थागतान् गतिविधीन् प्रधानकार्याणि च सूचयन्ति।

मूल्याङ्कनप्रत्यायनयोः कृते आधाररूपेण अधोलिखिताः सप्त निकषाः रा .मू.प्र.परिषदा निश्चिताः। ते यथा –

1. पाठ्यचर्यापक्षाः।
2. शिक्षणाधिगमप्रक्रिया मूल्याङ्कनं च।
3. अनुसन्धानं, नवाचाराः, विस्तारश्च।
4. आधारभूतसंरचना अधिगमसंसाधनानि च।
5. छात्राणां प्रोद्बलनं पुरोगतिश्च।
6. प्रशासनं ,नेतृत्वं, प्रबन्धनं च।
7. सांस्थानिकमूल्यानि सर्वोत्तमपरिपाटयश्च।

निकषाश्रितमूल्याङ्कनं मूल्याधारितनिर्णयं प्रोन्नयति। तद्यथा – ‘ प्रशासनं ,नेतृत्वं , प्रबन्धनं च‘ इति निकषः - भागग्राहित्वं, पारदर्शिता, गणकार्यं, प्रणालीदृष्टिः, न्यायः, आत्मप्रत्ययः, सार्वजनिकेषु अर्थेषु शुचिता - इत्यादीनि मूल्यानि प्रोन्नयति।

एतेषु सप्तसु निकषेषु सुचिन्तितानां प्रधानसूचकानां विकासः रा .मू.प्र.परिषदा कृतपूर्वः। संस्कृतविश्वविद्यालयानाम् उच्चतरसंस्कृताध्ययनसंस्थानाञ्च विशिष्टस्वरूपमभिलक्ष्य ध्येयानां कार्यविधानानाम् अनुगुणं सर्वेषु प्रधानपक्षेषु अतिरिक्तसूचकानि सन्निवेशितानि। तानि संस्कृतविश्वविद्यालयानाम् उच्चतरसंस्कृताध्ययनसंस्थानाञ्च गुणधर्मान् मूल्यानि च प्रतिबिम्बयन्ति , यदाधारेण मूल्याङ्कनं करणीयमस्ति। प्रत्येकं प्रधानपक्षे विद्यमानानि सूचकानि विशेषतः संस्थायाः उपलब्धीः समग्रकार्यरीतीश्च केन्द्रीकुर्वन्ति। एकस्मिन् स्थाने विद्यमानाः शक्तयः दौर्बल्यानि वा स्थानान्तरे गुणवत्तां प्रभावयेयुः। अतः निकषेषु प्रधानपक्षेषु च गाढं संबद्धानि तत्त्वानि क्वचित् पुनरुक्तानीव प्रतीयेरन्। एते निकषाः प्रधानपक्षाश्च स्वयमेव प्रमाणानि मापनोपकरणानि वा नैव सन्ति। तेषु निकषेषु प्रधानपक्षेषु च संस्कृतविश्वविद्यालयैः उच्चतरसंस्कृताध्ययनसंस्थाभिः च क्रियमाणं सर्वमपि न अन्तर्भवति। एते निकषाः प्रधानपक्षाश्च मूल्याङ्कनविषयीभूतायाः संस्थायाः गुणवत्तां मूल्याङ्कनं च बाह्यपरीक्षणावसरप्रदानेन ताम् उपकुर्वन्ति। समग्रदेशस्य उच्चतरशिक्षासंस्थानां मूल्याङ्कनाय प्रत्यायनाय च रा .मू.प्र.परिषदा विश्वजनीनरूपरेखा निर्मिता या हि

संस्कृतविश्वविद्यालयानाम् उच्चतरसंस्कृताध्यायनसंस्थानां परिप्रेक्ष्ये पुनर्निर्मितास्ति। एतस्याः रूपरेखायाः विनियोजनेन संस्कृतविश्वविद्यालयानाम् उच्चतरसंस्कृताध्ययनसंस्थानां च मुख्यधारायाम् आनयनार्थं संस्कृतशिक्षायाः समरूपताविकासे च महान् उपयोगो भवेत्।

**Criterion I - Curricular Aspects:** The Curricular Aspects are the mainstay of any educational institution. However, the responsibilities of various HEIs in this regard vary depending on their administrative standing. That is, an affiliated college is essentially a teaching unit which depends on a larger body namely university for legitimizing its academic and administrative processes. Its engagement with curricular aspects is mainly in their implementation while its participation in curriculum development, procedural detailing, assessment procedures as well as certification is peripheral and these are "givens''. Whereas a University has the mandate to visualize appropriate curricula for particular programmes, revise/update them periodically, ensure that the outcomes of its programmes are defined by its bodies. In case of Autonomous Colleges curricular responsibilities are similar to the universities.

Criterion I pertains to the practices of an institution in initiating a wide range of programme options and courses that are in tune with the emerging national and global trends and relevant to the local needs. Apart from issues of diversity and academic flexibility, aspects of career orientation, multi-skill development, feedback system and involvement of stakeholders in curriculum updation, are also gauged.

1. **प्रथमः निकषः – पाठ्यचर्यापक्षाः**

प्रत्येकं शैक्षिकसंस्थायाः मूलाधारः भवति पाठ्यचर्यापक्षाः। सन्दर्भेऽस्मिन् विविधोच्चशिक्षासंस्थानाम् उत्तरदायित्वं प्राशासनिकदृष्ट्या भिन्नं भवति। सम्बद्धमहाविद्यालयः सामान्यतः अध्यापनकार्यं निर्वहन् स्वीयशैक्षिकप्राशासनिकप्रक्रियाणां नियमबद्धीकरणार्थं विश्वविद्यालयमाश्रित्य तिष्ठति। सम्बद्धमहाविद्यालयस्य योगदानं पाठ्यचर्यापक्षाणां क्रियान्वयनपर्यन्तमेव भवति। पाठ्यचर्यायाः विकासे, क्रियान्वये, मूल्याङ्कनप्रक्रियायां च तस्य उत्तरदायित्वं न भवति। परं विश्वविद्यालयस्य इदं प्रधानमुत्तरदायित्वं भवति यत् प्रत्येकं पाठ्यक्रमस्य पाठ्यचर्यायाः निर्माणम्, नियतकाले तस्मिन् संशोधनं, पाठ्यक्रमपरिणामाः यथा अधिगताः स्युः, तथा निर्धारितनिकायैः परिभाषिताः भवेयुः। स्वायत्तमहाविद्यालयानां पाठ्यचर्यासम्बद्धमुत्तरदायित्वं विश्वविद्यालयेन साम्यं भजते।

निकषोऽयं सम्बद्ध्यते यत् संस्थाद्वारा प्रचाल्यमानानां विविधप्रकारकैच्छिकपाठ्यक्रमाणाम् आरम्भः उदयमानराष्ट्रियवैशिकप्रवृत्त्यनुगुणं तथा च स्थानीयावश्यकतानुगुणं स्यात् इति। शैक्षिकनमनीयतया विविधतासम्बद्धविषयैश्च सह

वृत्त्युन्मुखीकरणपक्षाः, बहुकौशलविकासः, प्रतिपुष्टिव्यवस्थाश्च भवेयुः। पाठ्यचर्यायाः नावीन्यसम्पादने लाभग्राहिणां भागग्रहणमपि भवेत्।

**KEY INDICATORS**

प्रधानसूचकाः

| |
|---|
| 1.1 Curriculum Design and Development<br>पाठ्यचर्यायाः संरचना विकासश्च<br>1.2 Academic flexibility<br>शैक्षिकनमनीयता<br>1.3 Curriculum Enrichment<br>पाठ्यचर्यासंवर्धनम्<br>1.4 Feedback System<br>प्रतिपुष्टिप्रणाली |

**1.1 Curriculum Design and Development**

One of the important responsibilities of the Universities and Autonomous Colleges in Sanskrit is Curriculum Design and Development and They are expected to have processes, systems and structures in place to discharge this responsibility. Curriculum Design and Development is a complex process of developing appropriate need-based inputs in consultation with expert groups and stakeholders. This results in the development of relevant programmes with flexibility to suit the professional and academic needs of the students and realization of core values. The Key Indicator (KI) also considers the good practices of the institution in initiating a range of programme options and courses that are relevant to the local needs and are in tune with the emerging national and global trends.

Curriculum evolved by the University/Autonomous College comprises Programme Outcomes (POs), Programme Specific Outcomes (PSOs) and Course Outcomes (COs), the substantive outlines of courses in every discipline (syllabus), organizational details of implementation as well as assessment of student performance and thereby attainment of PSOs and COs. The quality element is reflected in the efforts to revise, update, include emerging concerns etc., the University/Autonomous College makes in this regard. The Curriculum so designed may also focus on employability, entrepreneurship and skill development. The POs, PSOs, COs could be uploaded on Institutional website.

## 1.1. पाठ्यचर्यायाः संरचना विकासश्च

पाठ्यचर्यायाः प्रा रूपनिर्माणे विकासे च संस्कृतविश्वविद्यालयानाम् उच्चतरसंस्कृताध्ययनसंस्थानाञ्च महती भूमिका वर्तते। अत एतत् उत्तरदायित्वं निर्वोढुं तत्र प्रक्रियाः, प्रणाल्यः संरचनाश्च व्यवस्थिताः भवेयुः। पाठ्यक्रमरचना तद्विकासश्च इति एका संश्लिष्टप्रक्रिया, यत्र बहुविधक्रमाः विशेषज्ञताश्च अपेक्षिताः भवन्ति। लाभग्राहिभ्यः प्राप्तायाः प्रतिपुष्टेः आधारेण , विशेषज्ञसमुदायस्य विचारविमर्शनेन च योग्यपाठ्यक्रमविकासस्य प्रक्रियेयम्। एतत्फलरूपेण शैक्षिकनमनीयतया सह प्रासङ्गिकपाठ्यक्रमाणां विकासो भवति। ते च पाठ्यक्रमाः छात्राणां , व्यावसायिकानां, व्यक्तिगतानाम् आवश्यकतानुगुणं भवन्ति , प्रधानमूल्यानि च साक्षात्कारयन्ति। अयं प्रधानसूचकः अधोनिर्दिष्टेषु विद्यमानाः सर्वोत्तमपरिपाटीः परिशीलयति यत्र संस्थ या प्रारब्धाः नानापाठ्यक्रमविकल्पाः पाठ्यक्रमशृंखलाश्च स्थानिकावश्यकतायाम् उपयुक्ताः स्युः अपि च उदयमानानां राष्ट्रिय - वैश्विक-प्रवृत्तीनामनुगुणं सामञ्जस्यं भजेयुः।

### 1.2 Academic Flexibility

Academic flexibility refers to freedom in the use of the time-frame of the courses, horizontal mobility by way of deputation and exchange of the faculty, students and inter-disciplinary options facilitated by curricular transactions. Supplementary enrichment programmes introduced as an initiative of the college, credit system and choice offered in the curriculum, in terms of programme, curricular transactions and time-frame options are also considered in key Indicators.

## 1.2. शैक्षिकनमनीयता

'शैक्षिकनमनीयता' इति शब्दोऽयं पाठ्य चर्यान्तर्गतयाः स मयबद्धरूपरेखायाः स्वेच्छयोपयोगं, शिक्षकाणां छात्राणाञ्च विशिष्टं नियोजनं, विनिमयम्, अन्तःशास्त्रीयविकल्पान् पाठ्यक्रमव्यवहारोपयुक्तान् तदितरांशांश्च दर्शयति। महाविद्यालयेन संप्रेरकरूपेण समारब्धाः संपूरकपरिवर्धकपाठ्यक्रमाः , श्रेयःप्रणालीव्यवस्था, पाठ्यक्रमे छात्राणां कृते ग्राह्यविकल्पाः, पाठ्यसमयबद्धविकल्पाश्च अत्रैव समालोच्यन्ते।

**1.3 Curriculum Enrichment**

Every academic institution translates the curriculum framework and the specified syllabus by rendering them into practical forms, in which the main focus is on the student attributes and on holistic development of the students so that he/she can display multiple skills and qualities. For effective transaction of the curriculum it is required to be up-to date. For keeping the curriculum up-to-date and introduce appropriate changes in the given curriculum, several inputs are provided parallelly or sequentially. All these would be possible through introduction and use of quality materials which would enrich the curriculum and provide concrete referents for organizing the curriculum. It is expected that the SUs and IHSS would develop unique foundation courses suited to the vision of the institution. They are also expected to provide language competencies in Sanskrit and various Indian and foreign languages. The students should be given exposure to ancient scripts used in the manuscripts and information about the latest discoveries of manuscripts.

## 1.3.पाठ्यचर्याभिवर्धनम्

प्रत्येकं शैक्षिकसंस्था पाठ्य चर्यारूपरेखां विशिष्टपाठ्यांशश्च व्यावहारिकतया समानीय स्पष्टतां यच्छेत् , यत्र विशेषतः छात्रगु णानां समग्रविकासे चावधानं दीयेत , येन छात्रः विभिन्नकौशलानि गुणांश्च अर्जयेत्। पाठ्यचर्यायाः क्रियान्वयनं प्रभविष्णुतया भवेदिति हेतोः तस्याः अद्यतनत्वं सम्पादनीयम्। तदर्थं प्रदत्तपाठ्यक्रमे योग्यपरिवर्तनानां प्रारम्भार्थं समान्तरेण क्रमशः बहवः अन्तरंशाः प्रदत्ताः। सर्वमेतत् तदैव सुलभं भवति यदा गुणवत्तासामग्र्याः प्रवेशनं विनियोगश्च भवेताम् , यद्द्वारा पाठ्यचर्याविकासो भवेत्। पाठ्यक्रमस्य आयोजने सुदृढं स न्दृब्धानि प्रकरणानि निवेशनीयानि। संस्कृतविश्वविद्यालयाः उच्चतरसंस्कृताध्ययनसंस्थाश्च स्वीयध्येयानुगुणं विलक्षणानां प्राथमिकपाठ्यक्रमाणां निर्माणं कुर्युः। संस्कृते तथा विभिन्नासु भारतीयासु पाश्चात्त्यासु च भाषासु भाषासामर्थ्यानि प्रकल्पयेयुः। हस्तलिखितग्रन्थानां परिशीलनाय पुरालिपिशास्त्रमपि छात्राः परिचिन्वन्तु नाम, साम्प्रतिककाले नूतनतया आविष्कृतानां हस्तलिखितानां प्राचीनलिपीनां ज्ञानमपि चाप्नुवन्तु।

**1.4 Feedback System**

The process of revision and redesign of curricula is based on recent developments and feedback from the stakeholders. The feedback from all stakeholders in terms of its relevance and appropriateness in catering to the needs of the society, economy and environment helps in improving inputs.

A HEI with the feedback system in place, will have an active process of not only collecting feedback from all stakeholders, but also analyzing it and identifying and drawing pertinent pointers to enhance the learning effectiveness.

## 1.4.प्रतिपुष्टिप्रणाली

अचिरं सञ्जातान् विकासान्, लाभग्राहिणां प्रतिक्रियाव्यवस्थाश्च आश्रित्य पाठ्यचर्याणां पुनर्विचारस्य पुनारचनायाश्च प्रक्रिया संभवति। स्वीयप्रासंगिकता म् औ चित्यं च परिलक्ष्य सर्वेभ्यः लाभग्राहिभ्यः संप्राप्तायाः सूचनायाः समवलोकनमत्र क्रियते , येन समाजस्य अर्थव्यवस्थायाः पर्यावरणस्य च आवश्यकतापरिपूर्तिर्भवेत्।

1. **Criterion II - Teaching-Learning and Evaluation:** Criterion II pertains to the efforts of an institution to serve students of different backgrounds and abilities, through effective teaching-learning experiences. Interactive instructional techniques that engage students in higher order 'thinking' and investigation, through the use of interviews, focused group discussions, debates, projects, presentations, experiments, practicals, internship and application of ICT resources, are important considerations. It also probes into the adequacy, competence as well as the continuous professional development of the faculty who handle the programmes of study. The efficiency of the techniques used to continuously evaluate the performance of teachers and students is also a major concern of this criterion. The focus of this criterion is captured in the following Key Aspects:

**द्वितीयः निकषः – शिक्षणाधिगमः मूल्याङ्कनं च**

संस्थानां वि भिन्नैः प्रयासैः विविध पृष्ठभूमिवतां विविधकौशलयुक्तानाञ्च छात्राणां प्रभविष्णुना अ ध्यापनेन सेवेति निकषस्यास्य विषयः। साक्षात्काराः , विमर्शकेन्द्रितसामूहिकसङ्गोष्ठ्यः, वादाः, योजनाः, प्रस्तुतीकरणं, प्रयोगाः, प्रायोगिकम्, आन्तरिकप्रशिक्षणं, सूचनासम्प्रेषण-प्रविधिसंसाधनानां विनियोग इत्येतेषाम् उपयोगेन च्छात्रेषु उत्कृष्टचिन्तनम् अनुसन्धानप्रवृत्तिं च अभिवर्धयतां प्रतिसंवादात्मक - उपदेशप्रदविधानाम् अन्तर्भावोऽपि अत्र भवति। पाठ्यांशपूरणे शिक्षकाणां पर्याप्तता, योग्यता तथा सततव्यावसायिकविकास इत्येते अपि बिन्दवः अस्यैव निकषस्य विषयाः। शिक्षकाणां छात्राणां च निष्पत्तेः सततमूल्याङ्कनस्य कृते उपयुज्यमानानां प्रविधीनां दक्षता अपि अनेन भवति। अस्य निकषस्य केन्द्रभूताः प्रमुखांशाः एवं भवन्ति –

**KEY INDICATORS**

**प्रधानसूचकाः**

| |
|---|
| **2.1 Student Enrolment and Profile**<br>छात्रनामाङ्कनं छात्रविवरणिका च<br>**2.2 Catering to Student Diversity**<br>छात्रवैविध्यस्य आवश्यकतानां सम्पूर्तिः<br>**2.3 Teaching-Learning Process**<br>शिक्षणाधिगमप्रक्रिया<br>**2.4 Teachers' Profile and Quality**<br>अध्यापकविवरणिका तद्गुणवत्ता च<br>2.5 **Evaluation Process and Reforms**<br>मूल्याङ्कनप्रक्रिया तत्र परिष्काराश्च<br>**2.6 Student Performance and Learning Outcomes**<br>छात्रस्य निष्पत्तिः अधिगमपरिणामश्च<br>**2.7 Student Satisfaction Survey**<br>छात्रसन्तुष्टेः सर्वेक्षणम्। |

**2.1 Student Enrolment and Profile**

It is expected that the SUs should adopt strategies for attracting students to join traditional courses in Sanskrit. They should also initiate the process of on-line admissions. The process of admitting students to various programmes must be transparent with a well-administered mechanism, complying with all the norms of the concerned regulatory/governing agencies including State and Central Governments. Apart from compliance to the various regulations the key aspect also considers the institutional efforts in ensuring equity and wide access as reflected in the students' profile having representation of student community from different geographical areas and socio-economic, cultural and educational backgrounds.

2.1 **छात्रनामाङ्कनं छात्रविवरणिका च**

संस्कृते विद्यमानेषु पारम्परिकपाठ्यक्रमेषु प्रवेशनार्थं छात्रान् आक्रष्टुं विश्वविद्यालयैः व्यूहाः अवलम्बनीयाः इति अपेक्षा। अधितन्त्रिद्वारा प्रवेशप्रक्रिया आरब्धव्या। विभिन्नेषु पाठ्यक्रमेषु छात्राणां प्रवेशप्रक्रिया उत्तमप्रशासितप्रक्रियायुक्ता सती पारदर्शि नी भवेत्, यत्र राज्य-केन्द्र-शासितैः संबद्धानां नियामकव्यवस्थानां मानदण्डानाञ्च अनुपालनं भवेत्। विभिन्नानां नियततत्त्वानामनुपालनेन सहैव समानतायाः व्यापकलभ्यतायाश्च आश्वासनस्य

कृते संस्थानां परिश्रमः , विभिन्नभौगोलिकक्षेत्रेभ्यः, विभिन्नसामाजिक-आर्थिक-सांस्कृतिक-शैक्षिकपृष्ठभूमिभ्य आगतानां छात्राणां समुदायस्य प्रतिनिधित्वमपि निकषेऽत्र प्रधानं भवति।

### 2.2 Catering to Student Diversity

The SUs and IHSS are expected to cater to the needs of the students from diverse backgrounds including backward communities and locations. They would make special efforts to bring in students from special categories, address their special learning needs by initial assessment of their learning levels and meet them, possible variations over years and how and what is done to deal with such, in uni-gender institutions explicit efforts made to sensitise students about the other gender, and the like. Efforts should be made to admit students from modern disciplines in SUs and HEIS with courses prepared for it.

## 2.2 छात्रवैविध्यस्य आवश्यकतानां सम्पूर्तिः

विभिन्नपृष्ठभूमीनाम्, अप्रगतसमुदायानां, विभिन्नक्षेत्राणां च छात्राणाम् आवश्यकताः परिपूरयितुं संस्कृतविश्वविद्यालयैः , उच्चतरसंस्कृताध्ययनसंस्थाभिश्च अवलम्बिताः पाठ्यक्रमाः व्यूहाश्च अस्य विषयः। आधुनिकशिक्षावतां छात्राणां प्रवेशः संस्कृतविश्वविद्यालयानां विभिन्नपाठ्यक्रमेषु यथा भवेत् , तथा सेतु पाठ्यक्रमाणां निर्माणं कर्तव्यम्।

एतैः संस्कृतविश्वविद्यालयैः संस्थाभिः च विशिष्टवर्गीयान् छात्रान् प्रवेश्य स्तरज्ञानार्थम् अपेक्षिताधिगमव्यवस्था कार्या। प्रारम्भिकपरीक्षां विधाय विद्यमानछात्राः समानलिङ्गकसंस्थासु विलिङ्गकानां विषये यथा संवेदनशीलाः भवेयुः , तथा प्रयतितव्यम्। संस्कृतविश्वविद्यालयैः उच्चतरसंस्कृताध्ययनसंस्थाभिश्च आधुनिकविषयाध्येतृच्छात्राणां प्रवेशार्थं विशेषप्रयत्नो विधेयः। तदनुगुणं सेतुपाठ्यक्रमाश्च निर्मातव्याः।

### 2.3 Teaching-Learning Process

Diversity of learners in respect of their backgrounds, abilities and other personal attributes provide a variety of learning experiences, including individual and collaborative learning. Teachers provide a variety of learning experiences, including individual and collaborative learning. Interactive and participatory approaches, if employed, create a feeling of responsibility in learners and make learning a process of construction of knowledge. Of late, digital resources for learning have become available and this makes learning more individualised, creative and dynamic. Quality of learning provided in the institution depends largely on teacher readiness to draw

upon such recently available technology supports and also the initiative to develop such learning resources to enrich teaching and will influence the extent of their learning. Teaching-learning modalities of the institution are rendered to be relevant for the learner group. The learner-centered education through appropriate methodologies facilitates effective learning. Teachers -learning; on teacher's familiarity with Learning Management Systems (LMSs), other e-resources available and how to meaningfully incorporate them in one's scheme of teaching-learning.

The SUs and IHSS are especially expected to cultivate the " Guru-Shishya-Parampara" and make the traditional methods of teaching and learning suited to the present context.

## 2.3 शिक्षणाधिगमप्रक्रिया

पृष्ठभूम्याश्रितं योग्यताश्रितं वैयक्तिकगुणाश्रितं च अधिगन्तॄणां वैविध्यमनु तेभ्यः नाना वैयक्तिक-संयुक्ताधिगमानुभवानां व्यवस्था कार्या। संस्थानाम् अध्ययन -अध्यापनरीतयः छात्रसमुदायस्य कृते योग्यरीत्या अनुप्रयुक्ताः स्युः। योग्यप्रतिविधिद्वारा छात्रकेन्द्रितशिक्षणं मूल्याङ्कनप्रक्रिया तत्र परिष्करणोपायाश्च अध्ययनस्य प्रभविष्णुतायाः कृते उपकारिणो भवन्ति। शिक्षकाः वैविध्यपूर्ण -अधिगमानुभवान् सृजन्तः वैयक्तिकं सामूहिकं चोभयविधम् अध्यापनं समावेशयन्ति। शिक्षकाः अन्तःक्रियात्मिकां भागग्राहितायुतां च उपागमपद्धतिमुपयुञ्जते, येन अधिगन्तृषु उत्तरदायित्वभावना जायते , अधिगमश्च ज्ञानोत्पादनप्रक्रियात्वेन परिणमति। संस्कृतविश्वविद्यालयाः , उच्चतरसंस्कृताध्ययनसंस्थाश्च गुरुशिष्यपरम्परासंस्कृतिं प्रोत्साहयेयुः , अध्ययनाध्यापनयोः प्राचीनपारम्परिकपद्धतीनां साम्प्रतिकसंदर्भे समन्वयञ्च कुर्युः। सूचनासम्प्रेषणप्रविधिसाधनानि , वैद्युतग्रन्थाः, स्फूर्तशिक्षणकक्षाः इत्यादीनि अध्ययनप्रणाल्याः अङ्गभूतानि भवेयुः। गुरुकुलकेन्द्रं संस्कृतवातावरणं जनयित्वा छात्रेषु सर्जनात्मकतया सह मूल्यव्यवस्थामुत्पादयेत्। आधुनिकविद्वद्भिः सह छात्राणां शिक्षकाणां च अन्तःक्रियात्मकः संवादो भवतु।

**2.4 Teacher Profile and Quality**

'Teacher Quality' is a composite term to indicate the quality of teachers in terms of their qualification. Teacher characteristics, the adequacy of recruitment procedures, faculty availability, professional development and recognition of teaching abilities. Teachers take initiative to learn and keep abreast of the latest developments, to innovate, continuously seek improvement in their work and strive for individual and institutional excellence. The teachers must be

encouraged to receive training in some particular shastras with eminent traditional pundits and shastra-chudamani scholars; and to participate in programmes like vakyartha-sabha, kavi-goshthi etc. apart from national and international conferences and seminars.

## 2.4 अध्यापकविवरणिका तद्गुणवत्ता च

शिक्षकगुणवत्ता इति समासशब्देन शिक्षकाणाम् अर्हता , गुणधर्माः, तेषां नियुक्तेः पर्याप्तप्रक्रियानुपालनं, शिक्षकाणामुपलब्धता, व्यावसायिकविकासः, शिक्षणकौशलानां प्रत्यभिज्ञानम् इत्येतत् सर्वं बोध्यते। स्वयमध्ययनरताः शिक्षकाः स्वक्षेत्रे सा म्प्रतिकविकासान् ज्ञात्वा स्वीयकार्ये सतताभिवृद्धिमभीप्सन्तः व्यक्तिस्तरे संस्थास्तरे च उत्कृष्टतायाः कृते परिश्राम्यन्ति। राष्ट्रिय-अन्ताराष्ट्रियसङ्गोष्ठीषु भागग्रहणेन सह विशिष्टानां विदुषां सन्निधौ विशेषतः शास्त्रचूडामणिविदुषां सन्निधौ कस्मिन्नपि शास्त्रे अध्ययनार्थं शिक्षकाः प्रवर्तयितव्याः। वाक्यार्थसभा , कविगोष्ठी इत्यादिकार्यक्रमेषु च भागग्रहणार्थं ते प्रोत्साहनीयाः।

### 2.5 Evaluation Process and Reforms

This Key Indicator looks at issues related to assessment of teaching, learning and evaluative processes and reforms, to increase the efficiency and effectiveness of the system. One of the purposes of evaluation is to provide development-inducing feedback. The qualitative dimension of evaluation is in its use for enhancing the competence of students. Innovative evaluation process is to gauge the knowledge and skills acquired at various levels of the programmes. The SUs should encourage the students to participate in Shalakaparikshas and similar activities. Adoption of Sanskrit as a medium for all examinations including theses and dissertations must be treated as a *desideratum*. (desirable)

These specifications are stated as PSOs and COs. The quality of assessment process in a HEI depends on how well the examination system actually tests the PSOs and COs, quality of questions, extent of transparency in the system, extent of development inducing feedback system and regularity in the conduct of examinations and declaration of results as well as the regulatory mechanisms for prompt action on possible errors.

## 2.5 मूल्याङ्कनप्रक्रिया तत्परिष्करणोपायाश्च :

मूल्याङ्कनप्रक्रियायाः कार्यकुशलतां प्रभविष्णुतां च संवर्धयितुं शिक्षण -अधिगम-मूल्याङ्कनपद्धतीनां परिष्कााराणां च मूल्याङ्कनमिति अस्य प्रधानसूचकस्य उद्देश्यम्। विकासाभिमुखा प्रतिपुष्टिः मूल्याङ्कनस्य अन्यतममुद्देश्यं भवति। मूल्याङ्कनस्य गुणवत्तायाः आयामः छात्रेषु क्षमतावृद्धिं केन्द्रीकरोति। पाठ्यक्रमाणां विविधस्तरेषु छात्रैः सम्पादितस्य ज्ञानस्य कौशलानां च मापनमिति अस्याः नवीनमूल्याङ्कनप्रक्रियायाः लक्ष्यम्। शलाकापरीक्षासु तथाविधकार्यक्रमेषु च छात्रा यथा भागं गृह्णीयुस्तथा संस्कृतविश्वविद्यालयैः ते प्रोत्साहनीयाः। सर्वपरीक्षासु , शोधप्रबन्धेषु, लघुशोधप्रबन्धेषु च संस्कृतभाषायाः अभिव्यक्तिमाध्यमत्वेन उपयोगः अभीष्टतमः।

पाठ्यक्रमविशिष्टपरिणामाः, पाठ्यांशपरिणामाश्च अग्रे विशिष्य वर्णिताः। उच्चतरशिक्षासंस्थानां मूल्याङ्कनप्रक्रियायाः गुणवत्ता परीक्षाप्रणाल्यां पूर्वोक्तपरिणामद्वयस्य यथायोग्यं संयोजने समाश्रिता भवति। प्रश्नानां गुणात्मकता , पारदर्शिव्यवस्था, प्रतिपुष्टिव्यवस्थायाः विकासः, समये परीक्षानिर्वहणम्, काले फलितांशघोषणा इत्यादिकम् अन्तर्भवति।

### 2.6 Student Performance and Learning Outcomes

The real test of the extent to which teaching learning has been effective in a HEI is reflected in the students' performance in the examinations. Students' performance is seen as the realization of learning outcomes which are specifications of what a student should be capable of doing on successful completion of a course and/or a programme.

## 2.6 छात्रस्य निष्पत्तिः अधिगमपरिणामाश्च

कस्यापि पाठ्यक्रमस्य समाप्तेरनन्तरं छात्रेण किम् अधिगतं किञ्च निष्पादितम् इत्येते अंशाः अधिगमपरिणामेषु प्रतिबिम्बिताः भवन्ति। अधिगमदृष्ट्या कौशलानां ज्ञानस्य च अधिगमपरिणामा एव अधिगमप्रक्रियायाः अभीप्सितोपलब्धिं विशदयन्ति।

### 2.7 Student Satisfaction Survey

All the efforts of teachers and the institution to make learning a meaningful process can be considered impactful only to the extent students perceive it to be meaningful. Their satisfaction level is decided by the kinds of experiences they undergo, the extent of the

"comfort" feeling as well as intellectual stimulation the learning situations provide. Their feedback significantly showcases the actual quality of teaching learning process enabling identification of the strengths of teaching as well as the possible improvements. Student Satisfaction, thus, is a direct indicator of the effectiveness of teaching learning in the institution. It may be impractical to capture this aspect from every student; however, every HEI can resort to a sample survey on a formalized basis to capture this significant feature. This is the reason the revised assessment framework of NAAC adopts survey of student satisfaction.

### 2.7. छात्रसन्तुष्टेः सर्वेक्षणम्

सर्वासां संस्थानां, सर्वेषामध्यापकानां च परिश्रमाणां लक्ष्यं तावत् छात्राणां फलप्रदः अर्थवान् अधिगमः। स च छात्रैः सम्यगनुभूत एव यशस्वितामाप्नोति । छात्राणां सन्तुष्टि रेव सर्वस्यास्य फलम् । तेषां संन्तुष्टेः स्तरः तदीयानुभवानामाधारेण , तेषां बौद्धिकोपलब्धीनामाधारेण, तथा सुखबोधानामाधारेण च निर्णीयते । एषा च पाठनपद्धतिविषये छात्राणां प्रतिक्रिया -प्रतिपुष्टिभ्यामेव ज्ञायते । तेन पठन -पाठनादौ गुणवत्ता साधयितुं शक्या। सा छात्रसन्तुष्टिः एव अध्यापनाधिगमसौकर्याणां तत्प्रभावस्य च ज्ञापिका भवति।

एतदर्थं परिष्कृतमूल्याङ्कनप्रक्रियायां छात्रसन्तुष्टिविषयकसर्वेक्षणस्य स्थानं कल्पनीयम्।

**Criterion III - Research, Innovations and Extension:** This criterion seeks information on the policies, practices and outcomes of the institution, with reference to research, consultancy and extension. It deals with the facilities provided and efforts made by the institution to promote 'research culture'. The institution has the responsibility to enable its faculty to undertake research projects useful to the society. Serving the community through extension activities is its social responsibility and it is a core value to be demonstrated by all institutions. Interdisciplinary research and knowledge of multiple shastras should be encouraged. The focus of this criterion is captured in the following Key Aspects:

### तृतीयः निकषः – अनुसन्धानं, नवाचारः विस्तारश्च

अनुसन्धानं, नवाचारः, विस्तारः इत्येतेषु विषयेषु संस्थानां योजनाः , क्रियाः परिणामाश्च के इति ज्ञानसम्पादनमस्य निकषस्य विषयः। संशोधनसंस्कृतिमभिवर्धयितुं संस्थया काः सुविधाः प्रकल्पिताः , के च प्रयासाः कृता इत्यपि विषयोऽस्य निकषस्य।

समाजोपयोगिपरियोजनाः शिक्षका यथा आरभेरन् तथा सामर्थ्यसम्पादनस्य उत्तरदायित्वं संस्थाया भवति। वि स्तारप्रक्रियया समाजसेवा इति य त् सा माजिकम् उत्तरदायित्वमस्ति, तत् संस्थाभिः उपपादनीयम्। तदेवा स्मिन् कषे सर्वङ्कषतया मूल्यायमानम् । अन्तःशास्त्रीयमनुसन्धानं नानाशास्त्राणां परिज्ञानं च प्रोत्साहनीयम्।

निकषस्यास्य केन्द्रबिन्दवः अधोदर्शितरीत्या भवन्ति।

**<u>KEY INDICATORS</u>**

**प्रधानसूचकाः**

| |
|---|
| **3.1 Promotion of Research and Facilities**<br>**अनुसन्धानप्रोन्नयनं सौविध्यानि च।** |
| **3.2 Resource Mobilization for Research**<br>**अनुसन्धानाय आर्थिकस्रोतसां सङ्ग्रहः।** |
| **3.3 Innovation Ecosystem**<br>**नवाचारयुता अन्योन्याश्रयव्यवस्था।** |
| **3.4 Research Publications and Awards**<br>**शोधप्रकाशनानि पुरस्काराश्च** |
| **3.5 Consultancy**<br>**परामर्शः।** |
| **3.6 Extension Activities**<br>**विस्तारगतिविधयः।** |
| **3.7 Collaboration**<br>**सहयोगाः।** |

**3.1 Promotion of Research and facilities**

Promotion of research is a significant responsibility of HEIs particularly of universities without which ‘research culture’ on campus cannot be realised. The HEIs have to be actively engaged in this through evolving appropriate policies and practices, making adequate resources available, encouraging active research involvement of teachers and scholars in research as well as recognizing any achievement of teachers through research. It also includes responsiveness and administrative supportiveness (procedural flexibility) in the institution in utilizing the support and resources available with the Government agencies and/or other agencies. Required infrastructure in terms of space and equipment and support facilities are made available on the campus for undertaking research. The institution collaborates with other agencies, institutions, research bodies for sharing research facilities and undertaking collaborative research.

The SUs are also expected to promote critical and appreciation of manuscripts and composition of tikas (New Comentries) in Sanskrit. Every SU should have a Centre of Research and Study for dissemination of Shastric learning.

## 3.1 अनुसन्धानप्रोन्नयनं सौविध्यानि च

अनुसन्धानस्य प्रोन्नयनम् उच्चतरसंस्कृताध्ययनसंस्थानां प्रधानम् उत्तरदायित्वं विशिष्य विश्वविद्यालयानां , यस्य च अभावे विश्वविद्यालयपरिसरे अनुसन्धानसंस्कृतेः अनुभूतिः न स्यात्। उच्चतरसंस्कृताध्ययनसंस्थाभिः अस्याः विकासार्थम् अधोलिखितोपायाः आश्रयणीयाः, यत्र समुचितनीतीनां परिपाटीनाञ्च निर्माणं, पर्याप्तसंसाधनानाम् उपलब्धिः, अनुसन्धाने सक्रियभागग्रहणाय शिक्षकाणां छात्राणाञ्च प्रोत्साहनम्, अनुसन्धानेन प्राप्तोपलब्धेः अभिज्ञानम् इत्यादयः अन्तर्भवन्ति। सर्वकारीयाभिकरणेषु सर्वकारेतराभिकरणेषु च उपलभ्यमानसंसाधनानां प्रोद्बलनानाञ्च सम्पूर्णविनियोगः यथा स्यात् तथा संस्थायां प्रतिक्रियाशीलत्वं प्राशासनिकप्रोद्बलनञ्च (प्रक्रियायां नमनीयता) भवेत्। अनुसन्धानं कर्तुं संस्थायाम् अपेक्षितमूलभूतसौकर्याणि, यथास्थलम् उपकरणानि प्रोद्बलनसौविध्यानि च उपलब्धाः स्युः। संस्था अन्याभिकरणैः, संस्थाभिः, अनुसन्धाननिकायैश्च सह अनुसन्धानसौविध्यानां संविभागं कुर्यात्, सहयोग्यानुसन्धानार्थम् उपक्रमेत च। आर्थिकस्रोतसां तदितरसुविधानां च प्रकल्पनेन अनुसन्धाने तत्संबद्धकार्येषु च भागग्रहणप्रोत्साहनेन शिक्षकेषु छात्रेषु च अनुसन्धानसंस्कृतेः समुन्नयनं भवति। हस्तलिखितानां ग्रन्थानां विमर्शात्मकसम्पादनं संस्कृतविश्वविद्यालयैः प्रोत्साहनीयम्। संस्कृतटीकानिर्माणस्य प्रोत्साहनं करणीयम्। प्रत्येकं संस्कृतविश्वविद्यालये शास्त्राध्ययनस्य कृते एकं संशोधन-अध्ययनकेन्द्रं भवेत्।

### 3.2 Resource Mobilization for Research

The institution provides support in terms of financial, academic and human resources required with timely administrative decisions to enable faculty to submit project proposals funding agencies to seek funds for research. The institutional support to its faculty for submitting research projects and securing external funding through flexibility in administrative processes and infrastructure and academic support are crucial for any institution to excel in research. The faculty are empowered to take up research activities utilizing the existing facilities. The institution encourages its staff to

engage in interdisciplinary and interdepartmental research activities and resource sharing.

## 3.2 अनुसन्धानाय आर्थिकस्रोतसां संग्रहः

अनुसन्धानस्य कृते आर्थिकस्रोतसां संग्रहार्थं विश्वविद्यालयेन / संस्थया आर्थिक - शैक्षिक-मानवसंसाधनात्मकसाहाय्यद्वारा योग्यकाले प्रशासकीयनिर्णयद्वारा च शिक्षकाः यथा अनुसन्धानपरियोजनाः समर्पयेयुः , आर्थिकसाहाय्यप्रदातृसंस्थाश्च उपगच्छेयुः ; तथा सहयोगः कार्यः। अनुसन्धाने उत्कृष्टताया आधानाय संस्थया अनुसन्धानपरियोजनानां समर्पणसमये प्रशासकीयप्रक्रियासु नमनीयता , शिक्षकेभ्यः सहकारप्रदानं , बाह्यस्रोतोभ्यः आर्थिकसाहाय्यसमीकरणं, शैक्षणिकसाहाय्यमित्येत् सर्वम् अत्यन्तमहत्त्वमावहति। अन्तःशास्त्रीयाणाम् अन्तर्विभागीयानां च अनुसन्धानकार्याणां कृते विनिमयार्थं संस्थया शिक्षकाः प्रवर्तितव्याः। प्रकाशनानाम् अनुसन्धानपत्रिकाणां च प्रकाशनस्य कृते सहभागात्मकपरियोजनाः स्वीकर्तव्याः।

### 3.3 Innovation Ecosystem

The Institution has created an ecosystem for innovation including incubation centre and other initiatives for creation and transfer of knowledge. The institution conducts workshops/seminars on Intellectual Property Rights (IPR), Industry-Academia Innovative practices. Awards for innovation won by institution/teachers/research scholars/students, start-ups incubated on-campus are explicitly commended by the institution.

## 3.3 नवाचारयुता अन्योन्याश्रयव्यवस्था

संस्थया ज्ञानविनिमयार्थं ज्ञानसर्जनार्थं च अन्योन्याश्रयव्यवस्था परिकल्पनीया । एतस्या सुष्ठुनिर्वहणाय केन्द्रमेकमपेक्षितम्। तेन नानाक्षेत्रेषु नवोन्मेषाय नैसर्गिकी व्यवस्था सेत्स्यति। संस्थाद्वारा बौद्धिकस्वत्त्वाधिकारादिविषयेषु गोष्ठी आयोजनीया । उद्यमिभिः सह सम्बन्धः स्थापनीयः। अध्यापकाः छात्राश्च नवाचारान् सम्पादयितुं प्रोत्साहिताः पुरस्कृताश्च भवन्तु।

### 3.4 Research Publications and Awards

Exploration and reflection are crucial for any teacher to be effective in his/her job. Quality research outcome is beneficial for the discipline/ society/ industry/ region and the nation. Sharing of knowledge especially theoretical and practical findings of research, through

various media enhances quality of teaching and learning. Research acumen in an institution is an evolving feature reflecting discoveries, number of patents obtained, number of research publications.

A process for a proper review of the research works undertaken under the aegis of the University must be developed and encouragement must be given to both critical and creative writings.

## 3.4. शोधप्रकाशनानि पुरस्काराश्च

स्वक्षेत्रे प्रभावं जनयितुं प्रत्येकं शिक्षकः अन्वेषणं मननं निदिध्यासनं च नितरामपेक्षते। विद्यायाः , समाजस्य, उद्योगानां, प्रान्तस्य, राष्ट्रस्य च कृते गुणवत्तापूर्णः संशोधनपरिणामः उपयोगी भवति। ज्ञानविनिमयः विशेषतः सैद्धान्तिक -प्रायौगिकरीत्या संशोधनपरिणामानां विनिमयः विभिन्नसाधनैः अध्ययनाध्यापनयोः गुणवत्तां वर्धयति। संस्थायाः शोधकार्याणां प्रमाणरूपेण विद्यावारिधिशोधप्रबन्धाः, परियोजनाः, आविष्काराः, परिष्काराः, शोधाधिकारपत्राणि, शोधपत्राणि च संगृह्य प्रदर्शनीयानि स्युः।

विश्वविद्यालयस्य आर्थिकसाहाय्येन स्वीकृतस्य संशोधनकार्यस्य योग्यसमीक्षणार्थं प्रक्रियाऽपि विकासनीया। विमर्शनात्मक-सर्जनात्मककृतयश्च प्रोत्साहनीया।

### 3.5 Consultancy

An activity organized or managed by the Faculty for an external agency for which the expertise and the specific knowledge base of the faculty becomes the major input. The finances generated through consultancy are fairly utilized by the institution. The faculty taking up the consultancy is properly rewarded. The faculty in a SU is required to meet the societal expectations in terms of sharing of knowledge and expertise**.** University is a resource pool with several persons engaged in research at various levels. Consultancy shows the credibility of the university’s research acumen in the outside world. While the university personnel extend their expertise to other agencies, the university also generates some revenue along with the research faculty. For this it is necessary that the university has a formalized policy on consultancy with clear specification of revenue sharing between the teacher and the institution. This may not be a formalized aspect of a college.

### परामर्शः

अत्र शिक्षकाणां विशिष्टकौशलस्य विशिष्टज्ञानस्य च आधारेण कस्यापि बाह्याभिकरणविशेषस्य कृते शिक्षकेण कृता कारिता वा क्रिया प्रधानविषयः भवति। एतेन अर्जिता आर्थिकसम्पत्तिः संस्थया योग्यरीत्या विनियोक्तव्या। परामर्शदायिनः

शिक्षकाः यथोचितं पुरस्कार्याः। संस्कृतविश्वविद्यालयस्य शिक्षकैः ज्ञानस्य अनुभवस्य च विनिमये समर्थैः भाव्यम्। विश्वविद्यालयः विविधस्तरेषु अनुसन्धाने कार्यरतानां बहूनां जनानां संसाधनसमूहः भवति। परामर्शः बाह्यप्रपञ्चे विश्वविद्यालयस्य अनुसन्धानकुशाग्रतां विश्वसनीयतां च वर्धयति। विश्वविद्यालयस्य कर्मचारिणः अन्यसंस्थानां कृते स्वीयविशेषज्ञतां विस्तारयन्ति, अनेन विश्वविद्यालयोऽपि किञ्चित् आदायं प्राप्नोति। एतदर्थं विश्वविद्यालयेन परामर्शविषये औपचारिकनीतेः निर्माणं करणीयं यत्र प्राप्तस्य आदायस्य अध्यापकसंस्थयोः मध्ये संविभागस्य स्पष्टता स्यात्। महाविद्यालयसन्दर्भे एषा औपचारिकता नान्वेति।

**3.6 Extension Activities**

Learning activities have a visible element for developing sensitivities towards community issues, gender disparities, social inequity etc. and in inculcating values and commitment to society. Affiliation and interaction with groups or individuals who have an interest in the activities of the institution and the ability to influence the actions, decisions, policies, practices or goals of the organization leads to mutual benefit to both the parties. The processes and strategies inherent in such activities relevantly sensitize students to the social issues and contexts. Sustainable practices of the institution leading to superior performance results in successful outcomes in terms of generating knowledge useful for the learner as well as the community.

Extension also is an aspect of education, which emphasizes community services. These are often integrated with curricula as extended opportunities, intended to help, serve, reflect and learn. The curriculum-extension interface has an educational value, especially in rural India. The SUs should give attention to the task of popularizing Shastric learning in the surrounding areas and encourage the teachers to participate in social and electronic media in a creative way.

## 3.6 विस्तारगतिविधयः

अधिगमगतिविधयः सामाजिकविषयेषु , लैङ्गिकविभेदेषु, सामाजिकी विषमता इत्यादिषु च सुस्पष्टधारणां यथा वहन्ति , तथैव समाजे मूल्यानि प्रति बद्धतां च धारयितुं दायित्वमपि वहन्ति। संस्थायाः कार्यरीतिषु तन्निर्णययोजनाभ्यासलक्ष्यादिषु च ये रुचिशीलाः समूहा व्यक्तयो वा प्रभवन्ति , तेषां तासां च सम्पर्के ण अन्योन्योपकारक्षमता वर्धते। सामाजिकविषयेषु छात्राणां संवेदनशीलतां जनयितुम् आवश्यकप्रक्रियाः व्यूहाश्चात्र अन्तर्भवन्ति।

संस्थायाः अभिरक्षणपरिपाट्यः उत्कृष्टप्रदर्शनं जनयन्ति , तत्परिणामरूपेण सफलं छात्रोपयोगिसमाजोपयोगिज्ञानस्य उत्पादनं भवति।

विस्तारः अपि शिक्षायाः अन्यतमम् अङ्गम्। तेन समाजसेवावसराः अभ्यासक्रमेण सह समन्विता भवन्ति , यस्य लक्ष्यं तावत् उपकारः , सेवा, प्रतिफलनं शिक्षणञ्च। विशेषतः ग्रामीणभारते पाठ्यचर्या -विस्तारयोः समवेतं शैक्षिकमूल्यं विद्यते। संस्कृतविश्वविद्यालयानाम् एतत् कर्तव्यं यत् परिसरप्रान्तेषु संस्कृतशिक्षणं प्रसिद्धं कर्तुं विशिष्टप्रयासेषु अवधानं दातव्यम्। तथैव सामाजिकमाध्यमेषु वैद्युतीयमाध्यमेषु च सर्जनात्मकरीत्या भागं वोढुं शिक्षकाः प्रोत्साहनीयाः।

### 3.7 Collaborations

Through collaboration HEIs maintain a closer contact with the work field. It helps keep the academic activities in the HEI in a more realistic perspective and also expand the scope of learning experiences to students. Collaboration can be sought with academic institutions or other agencies of professional and social relevance. The range of activities could include training, student exchange, faculty exchange, research and resource sharing, among others. For making collaborative endeavor impactful it is necessary that there is a formal agreement or understanding between the institution and other HEIs or agencies for such activities.

## 3.7 सहयोगाः

उच्चशिक्षासंस्थाः सहयोगद्वारा कार्यक्षेत्रेण सह निकटसंपर्कं सम्पादयन्ति। अयं निकटसम्पर्कः उच्चशिक्षासंस्थायां शैक्षणिकगतिविधीनाम् अधिकतरं याथार्थ्यं सम्पादयितुं साहाय्यं करोति। अपि च छात्राणाम् अधिगमानुभवक्षेत्राणां विस्तारमपि करोति। शैक्षिकसंस्थाभिः, औद्योगिकसंस्थाभिः, वृत्तिपरसंस्थाभिः, सामाजिकप्रासंगिकाभिकरणैश्च सह सहयोगः चिन्तयितुं शक्यः। गतिविधिषु प्रशिक्षणं, छात्रविनिमयः, अध्यापकविनिमयः, अनुसंधान संसाधन संविभागः अपि अन्तर्भवितुम् अर्हति। संस्था प्रागुक्तगतिविधीनां विषये सहयोगप्रायासं प्रभावशालिनं कर्तुं उच्चशिक्षासंस्थायाः अभिकरणस्य च मध्ये औपचारिकं संम्बन्धम् अवगमं वा साधयेत्।

**Criterion IV - Infrastructure and Learning Resources**: The adequacy and optimal use of the facilities available in an institution are essential to maintain the quality of academic and other programmes on the campus. It also requires

information on how every constituent of the institution - students, teachers and staff - benefits from these facilities. Expansion of facilities to meet future development is included among other concerns.

The focus of Criterion IV is captured in the following Key Indicators:

## चतुर्थः निकषः - आधारभूतसंरचना अधिगमसंसाधनानि च

संस्थापरिसरे शैक्षणिकानां तदितरकार्याणां च गुणवत्तायाः परिरक्षणाय संस्थायाः सविधे पर्याप्तसुविधाः स्युः , तासां च सर्वात्मना विनियोगः अनिवार्यः इति अस्य निकषस्य विषयः। एताभ्यः सुविधाभ्यः संस्थायाः प्रत्येकमङ्गं नाम छात्राः , शिक्षकाः कर्मकराश्च कथं लाभान्विता भवन्तीति वृत्तमप्यत्र अपेक्ष्यते। तदितरसम्बद्धविषयेषु भाविविकासस्य कृते सुविधानां विस्तार इत्यपि अत्रैव अन्तर्भवति। अस्य निकषस्य प्रमुखबिन्दवः अधोदर्शिताः सन्ति –

**KEY INDICATORS**
**प्रधानसूचकाः**

**4.1 Physical Facilities**
भौतिकसौविध्यानि।

**4.2 Library as a Learning Resource**
अधिगमसंसाधनरूपेण ग्रन्थालयः।

**4.3 IT Infrastructure**
